उपशास्त्री-I खण्ड साहित्यम् तृतीय पत्रम्

रघुवंश महाकाव्यम्
द्वितीयः सर्गः

प्र० (1) - स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥

उत्तरम् = प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास-प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके राजा दिलीपः वनगमनस्य वर्णनं करोति। →
राजा दिलीपः वने सञ्चरन् लतासन्न गृहेषु वनाधिपधानुदेवता गीयमानां निजां कीर्तिमाकर्णितवान्। तत्र पुनः सच्छिद्रैः वर्णैः वायुपूरणेन स्वनद्भिः वंशवाद्यस्य कार्यं स्वदानरूपं समाचरितमिति।

व्याख्या: - सः = राजा, दिलीपः, मारुतपूर्णरन्ध्रैः = वायुपूर्णच्छिद्रैः, अत एव कूजद्भिः = स्वनद्भिः, कीचकैः = वेणुविशेषैः, आपादित वंशकृत्यं = सम्पादितमुरलीवाद्यकार्यं यथा स्यात्तथा, कुञ्जेषु = लतागृहेषु, वनदेवताभिः = काननदेवीभिः, उच्चैः = तारस्वरम्, उद्गीयमानं = प्रस्तूयमानम्, स्वं = आत्मीयम्, यशः = कीर्तिम्, शुश्राव = श्रुतवान् ।

Renu Devi
03/11/20
राधाउमाकान्त सं० महावि० सुखसेना, पूर्णिया।

शास्त्री-I खण्ड साहित्यम्

अभिज्ञानशाकुन्तलम्

षष्ठोऽङ्कः

प्र० (1)- दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन ।

स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ॥

उत्तरम् = प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्य शास्त्रस्य षष्ठोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके शकुन्तलाचित्रं तन्मयतयाऽवलोकयन् राजा दुष्यन्तो माधव्येन प्रतिबोधितो तमपराध्यं मन्यमाना ब्रवीति—

स्मृतिकारिणा = इदं चित्रं न साक्षात् शकुन्तलेति स्मृतिं कारितवता त्वया = माधव्येन तन्मयेन = शकुन्तलामयेन हृदयेन = चेतसा कान्तैवेयमिति दृढबुद्धया साक्षादिव = प्रत्यक्षमिव दर्शनसुखं = प्रियादर्शनानन्दम् अनुभवतः = उपलभमानस्य मे = मम कान्ता = दयिता प्रिया शकुन्तला, पुनरपि = भूयोऽपि चित्रीकृता = चित्ररूपेण परिणमिता, आश्चर्यरूपा कृता 'आलेख्याश्चर्ययोश्चित्रम्' इत्यमरः । अर्थात् मित्र माधव्य ! आत्मनो विरहविनोदाय प्रियाया शकुन्तलाया प्रतिमूर्तिं निर्माय तन्मयतया तां साक्षादिवोपस्थितां मत्वा तद् दर्शनसुखानि अनुभवती मम नेयं शकुन्तला, किन्तु तच्चित्रमिति कथनेन पुनस्त्वं त्वया स्मृति पथमुपनीता । तस्माद् भवतोऽयं महानपराधोऽस्ति, अत्रोत्प्रेक्षालङ्कार आर्याजातिश्च वृत्तं ।

Renu Devi

03/11/20

राधा उमाकान्त सं० महावि० सुरवसेना,

पूर्णिया ।

रघुवंश महाकाव्यम्
द्वितीयः सर्गः

प्र०-(1) पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ॥

उत्तरम्-प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा दिलीपः दिवारात्रिमध्ये सन्ध्या इव नन्दिन्याः वर्णनं करोति ।

वशिष्ठाश्रमस्य समीपे पृष्ठे राजा दिलीपः, मध्ये नन्दिनी पुनरग्रे सुदक्षिणा इति क्रम आसीत् । तदानीं दम्पत्योर्मध्ये स्थिता नन्दिनी दिनरात्र्योः मध्यस्थिता सन्ध्यावत् शुशुभे । अत्र प्रतापिनो राज्ञो दिलीपस्य दिनसादृश्यात् चन्द्रमुखायाश्च सुदक्षिणायाः चन्द्रयुतनिशासादृश्यात् पाटलवर्णाया नन्दिन्या दिनक्षपामध्यगतसन्ध्यासाम्यमाविष्कृतमस्ति ।

व्याख्या:- वर्त्मनि = मार्गे, पार्थिवेन = राजा दिलीपेन, पुरस्कृता = अग्रे कृता, किञ्च पार्थिवधर्मपत्न्या = राजमहिष्या सुदक्षिण्या, प्रत्युद्गता = अभियाता, सा धेनुः = नन्दिनी, तदन्तरे = सुदक्षिणा दिलीपयोर्मध्यगता सती, दिनक्षपामध्यगता = दिवसनिशामध्यवर्तिनी, सन्ध्या = सायंकाल, इव = यथा, विरराज = शुशुभे ।

Renu devi
03/11/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

शास्त्री - II खण्ड        साहित्यम्

रघुवंश महाकाव्यम्
चतुर्दशः सर्गः

प्र० (1) - तपस्विवेषक्रिययाऽपि तावद्यः प्रेक्षणीयः सुतरां बभूव ।
राजेन्द्रनेपथ्यविधानशोभा तस्योदिताऽऽसीत्पुनरुक्तदोषा ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य चतुर्दशसर्गात् उद्धृतोऽस्ति।
अस्मिन श्लोके श्रीरामस्य सौन्दर्यस्य वर्णनं करोति
यो हि रामः तपस्विवेशजटादिधारणेनापि सातिशयं दर्शनीय एवासीत्, स एव पुनः राजवेषरचनया द्विगुणतरो मनोज्ञो बभूव स्वाभाविकशोभावती रामस्य राजमुकुटादिराजचिन्ह धारणं सिद्धसाधनमिवाभवदित्यर्थः।

व्याख्याः - यः = रामः, तपस्विवेषक्रियया = तापसनेपथ्यरचनया अपि सुतरां = नितराम्, प्रेक्षणीयः = दर्शनीयः तावत् एव । बभूव संवृत्तः तस्य = श्रीरामस्य, राजेन्द्रनेपथ्यविधानशोभा = नृपवेषरचनाकान्ति पुनरुक्तदोषा = द्विगुणा, आसीत् = अभूत, समवर्तत ।

Renu Devi
03/11/20
राधाउमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।